# चिरञ्जीव्यादेषा शुभगुणधना "ज्ञानमती"

**भागचन्द्रो जैनो 'भागेन्दुः'**

**स जातो येन जातेन याति वंशः समुन्नतिम्।**
**परिवर्तिनि संसारे मतः को वा न जायते।।**

पद्येनानेन सुस्पष्टम्भवति यज्जगति तस्यैव जन्म सार्थकम् यस्य जन्मनः कुल–वंश–जाति–प्रभतयः अथ च समग्रं राष्ट्रं समुन्नतिं लभते। अन्यथा त्वस्मिन्नसारे संसारे प्रत्यहमनेके जायन्ते नेके च म्रियन्ते। नूनं हि परमपूजनीया गणिनीप्रमुखा आर्यिकारत्ना ज्ञानमतीमाता कथनमिदं चरितार्थयन्ती स्वकीयतपोनिष्ठ–जीवनशैल्या सारस्वताराधनया च सम्पूर्णे विश्वे राजते।

''न हि कतमुपकारं साधवो विस्मरन्ति'' – इत्युक्तिमभिलक्ष्यैतादक्–सन्मार्गनिष्ठान् महापुरुषान् प्रति कतज्ञतां प्रकाशनार्थं निखिले जगत्युत्सवानां महोत्सवानाञ्च परम्परा सततम्प्रवर्तमाना दरीदश्यते किन्तु तासु काश्चिदेव प्रसङ्गाः सर्वान् प्रभावयन्ति। जानीमो वयं यत् – परमपूजनीया गणिनीप्रमुखा र्यिकारत्ना श्रीज्ञानमतीमाता बहुश्रुता परमविदुषी अग्रगण्या तपस्विनी। सा हि ज्ञानस्य ध्यानस्य अध्यात्मस्य च त्रिवेणी–रूपेण सर्वत्र विश्रुता। सम्प्रति तस्या आर्यिकादीक्षायाः पञ्चाशत–वर्षाणि गुण–गौरवाभिवर्धकानि सम्पूर्तानि। सम्प्रति विराजमान–सर्वसाधु–साध्वीषु सर्वप्राचीनदीक्षितायाः पूजनीयश्रीज्ञानमतीमातु आर्यिका–दीक्षा–स्वर्ण– जयन्त्याः स्वर्णिमावसरो स्मन्महत्पुण्यैः समुपलब्धः।

'यथा नाम तथा गुणाः' इत्युक्तिं चरितार्थयन्ती ह्येषा चतुर्णामनुयोगानामप्रतिमा विद्वद्रत्ना। विंशशताब्द्याः विदुष्यार्यिकासु सर्वोत्कष्टं स्थानमधितिष्ठति। लेखने प्रवचने च परमप्रवीणा सा स्वकीयां चर्यां सम्यक् संसाध्य सुप्रसिद्ध–तीर्थक्षेत्राणां समुद्धारे समीचीनविकासे चापि दत्तावधाना सार्द्धद्विशताधिकग्रन्थानां प्रणेत्री विद्यते खलु। सा सर्वानभिलक्ष्य लिखति। तस्याः वैदुष्यं कर्तत्वञ्चानेकशो नुभूतम्मया। तस्याः लेखन्या ष्टसहस्री–प्रभतयो नेके कष्टपच्याः ग्रन्थरत्नाः प्रसूताः। पूजन–विधानानां रचनासु परमप्रावीण्यं लब्धवत्येषा। मातश्रिया रचितानि विधानानि सर्वत्र बहुप्रचारितानि प्रशंसतानि च प्रतिवर्षमनेकेषु स्थानेषु सामूहिकरूपेण परमप्रभावनया सोत्साहं सम्पाद्यन्ते। मातश्रिया रचिते महत्त्वपूर्णे द्वि–विधाने सौभाग्यवशाद् अस्माकमाचार्यत्वे पि देहल्यां ग्रीनपार्क एक्सटेंशन, इत्यस्मिन् क्षेत्रे रामकष्णपुरे च सुसम्पादिते। तत्रानुभूतं

सर्वैजनैर्विधानानां स्वारस्यं वैशिष्ट्यञ्च। मातश्रिया विरचिता कथाग्रन्था अपि सोद्देश्याः सदाचार–प्रतिष्ठापकाः।

मातश्रिया संस्थापितं 'दिगम्बर जैन त्रिलोकसंस्थानमपि' अनुपमभूतपूर्वञ्च कर्तत्वमस्ति। जैनागमेषु निदर्शितम्भौगोलिक–स्वरूपम्–सुमेरु–पर्वतं जम्बूद्वीपञ्च यत्र प्रत्यक्षमवगभ्यते।

सर्वैः प्रमुदितमनोभिरनुभूयते यद् हस्तिनापुरन्तु पूर्वत एव कल्याणक तीर्थरूपे सुप्रसिद्धमस्ति, किन्तु परमपूजनीयमातश्रिया 'जम्बूद्वीपस्य' रचनानन्तरं तस्य महत्त्वं द्विगुणाधिकमभिवर्द्धितमस्ति। साध्वी–(जैनार्यिका)–जीवनस्य समग्रचर्यां सम्यङ्कनिष्पादयन्त्येषा समागतजनान् दर्शनं प्रवचनञ्चापि प्रतिदिनं प्रददाति। एतेषु कार्येषु स्वकीयसाधनायाञ्च भशं निरता पि सा बहु लिखति इति वितथमपि महदाश्चर्यकरम्। विद्वद्भ्यः प्रेरणा स्रोतस्विनी सा विलक्षण–प्रतिभासम्पन्ना स्मतिपुञ्जप्रदीपा वर्तते। एतस्याः निदर्शनं 'मेरी स्मतियाँ' – इत्यस्मिन् ग्रन्थे भूयसो भवति। पुराण–वाङ्मयवत् सर्वाननुयोगान् सुललितमधुरशब्दैः प्राञ्जलशैल्यां सम्यग्प्रतिपादयति ग्रन्थरत्नो यम्।

विविध विषयेष्वखिलभारतीयसङ्गोष्ठीनामायोजनानि, जम्बूद्वीप–ज्ञान–ज्योति–रथ–प्रवर्तनानि श्रीज्ञानमतीमातश्रियः कर्तत्वस्य महदुपलब्धिरूपेणा–भिमतानि। एभिः मातश्रिया स्वकीयया प्रत्युत्पन्नमतित्वेन एकनिष्ठभावै–स्त्यागतपोभिश्च राष्ट्रे आध्यात्मिकतायाः सर्जने महद्योगं कतम्।

सततं भशं तपति चिन्तयति लिखति चैषा गणिनी–प्रमुखा। परिणामतो स्याः तपोपूतया लेखान्या 'अष्टसहस्री–मूलाचार–नियमसार–समयसार–षट्खण्डागम–कातन्त्र' प्रभतयः सार्द्धद्विशताधिकाः ग्रन्थरत्नाः सभाष्य–विशदव्याख्याभिः समलङ्कता सष्टाः।

खीष्टाब्दस्य १६३४ तमवर्षस्य अक्टूबर मासस्य २२ दिनाङ्के शरदपूर्णिमायां तिथौ उत्तरप्रदेशस्य बाराबंकी मण्डले ''टिकैतनगर'' नाम्नि नगरे लब्धजनिरस्याः नामकरणं 'मैना' इत्यभवत्। एतस्याः पितरौ श्रीमतीमोहिनीदेवी–श्री छोटेलालमहोदयौ आस्ताम्। मातरं मोहिनीदेवीं यौतके सम्प्राप्तस्य 'पद्मनन्दिपञ्चविंशतिका' – ग्रन्थस्य नियमितस्वाध्यायेन पूर्वजन्मनः सुदढवैराग्यसंस्कारैश्च केवलमष्टादशवर्षदेशीया कन्यका 'मैना' परमपूज्याचार्यरत्न – श्री १०८ देशभूषणमहाराजैः १६५२ खीष्टाब्दे शरदपूर्णिमायां तिथौ आजन्म–ब्रह्मचर्यव्रतस्वरूपं सप्तमप्रतिमायाः गहत्यागस्य च नियमान् स्वीचकार।

'चित्रं जैनीं तपस्या हि स्वैराचारविरोधिनी'' इति सम्यगभिजानन्नपि 'बालब्र. मैना' 'जैनेश्वरीदीक्षायाः' अभिलाषां स्वकीयेषु प्रत्येकेषु श्वासोच्छ्वासेषु समवेतवत्येषा १९५३ खीष्टाब्दे प.पू.श्री देशभूषणमहा–राजैरेव चैत्रमासस्य कष्णपक्षे प्रतिपदायां तिथौ राजस्थान प्रदेशस्य विश्वविख्याते श्रीमहावीरजी क्षेत्रे 'क्षुल्लिका' दीक्षां संधारितवती। अत्र तस्याः नाम 'क्षुलिल्का वीरमतीति' बभूव। तदनन्तरं चारित्रचक्रवर्ति – आचार्यशान्तिसागर – महाराजानां प्रथमपट्टाचार्यशिष्यैः श्रीमद्भिर्वीरसागर–महाराजैः १९५६ तमे खीष्टाब्दे बैशाखकष्णद्वितीयायां तिथौ राजस्थानप्रदेशस्य 'माधोराजपुरा' – नगरे 'आर्यिका'–दीक्षां प्राप्तवती। अतः परं तस्याः नामधेयम् 'आर्यिका ज्ञानमती' – त्यभवत्।

ज्ञानप्राप्तेर्बलीयसी पिपासा प्रारम्भत एवास्यां दरीदश्यते। दीक्षानन्तरं हि सा स्वां स्वाध्याय–मनन–चिन्तनानां धारासु निबध्नाति इति निश्चप्रचम्। जैनवाङ्गमयस्य विविधविषयाणाम् अध्यात्मागमदर्शन–न्याय–व्याकरण–साहित्यादिविषयाणां सम्यगध्ययनानुशीलनाध्यापनैः परमप्रावीण्य–माप्तवत्येषा संस्कत–प्राकतापभ्रंश–कन्नड़–मराठी–गुजराती– त्यादिभाषासु तन्निवद्ध वाङ्गमयेषु च प्रकाम–पाण्डित्यमप्यधिगतवत्येषा सम्प्रति राष्ट्रस्य सर्वश्रेष्ठाग्रगण्यविदुषी–रूपेण सुप्रतिष्ठिता स्वकीयं 'ज्ञानमती'–ति नाम सार्थक्यं प्रादात्।

१९६२ तमे खीष्टाब्दस्य अक्टूबरमासस्य अष्टमे दिनाङ्के 'अन्ता–राज्यीय चरित्र–निर्माणसंगोष्ठ्याः शुभप्रसङ्गे' हस्तिनापुरे अहं तु प्रथममेव तस्याः दर्शनेन ज्ञानेन चातितपस्वितया विनयेन दाक्षिण्येन च मधुरालापतया च निःसंगतया च प्रशान्तत्वेन च निरभिमानतया च महानुभावत्वेन च शुचितया चोपरूढगौरवो नभूवम्, तदानीन्तु तस्याः संघेन दर्शितसद्भावेन स्ववत्तान्तकथनेन तया च मौनतया हृतहृदयः सुतरामारोपितभक्तिरभवम्।

श्रद्धाभरितहृदयश्च शनैः शनैरेनामभाषममातः। क्लेशभीरुरकतज्ञः सुरवासग्लुब्धो लोकः तपो सदशं कर्मानुष्ठातुमशक्तः संसारस्यासारतां प्रति निष्फलेनाश्रुपातमात्रेण स्नेहमुपदर्शयन् रोदिति। त्वया तु कर्मणा सर्वमाचरन्त्या किमिव न तपस्विजनोचितमाचेष्टितम्, तदर्थमाजन्मनः प्रभति समुचितपरिचयः प्रेयानप्यसंस्तुत इव परित्यक्तो बान्धवजनः, सन्निहिता अपि तणावज्ञयावधीरिता विषयाः, मुक्तानि अतिशयितसम्पत्तिभोगानन्दाः, तनीयस्यपि नितरां तनिमानं महत्तपोभिरुपनीता तनुः, गहीतं ब्रह्मचर्यम्, आयोजितस्तपसि महत्यात्मा, वनिताजनदुष्करो प्यङ्गीकतः गहपरित्यागः।

परमपूजनीयामार्यिकारत्नां गणिनीं ज्ञानमती–मातरं दर्शं दर्शमनुभूयते स्माभि यदि् – अचिन्त्यो हि महात्मनां प्रभावः, बहुप्रकाराश्च संसारवत्तयः, चित्रञ्च दैवम्, आश्चर्यातिशय–युक्ताश्च तपः सिद्धयः अनेक–विधाश्च कर्मणां शक्तयः। अपि च सनिपुणमपि विमदि्भर्मनीषिभि–र्निगदितम्यथा –

**''क्षणभङ्गुरवत्तिजीवितं भवभाजामिति नात्र विस्मयः।**
**तदिहाद्भुतमेतमीदशं यदवश्यद्भिरपि प्रमुह्यते।।''**

–आचार्यवीरनन्दिनश्चन्द्रप्रभचरिते।

एतत्सर्वं समीक्ष्य वक्तुं पारयामो वयं यद्–पूज्यमाताश्रीः प्रत्येककार्यमागमानुकूल सम्पादनायैव प्रारम्भत एव स्वं प्रमुखं लक्ष्यं निर्धारितवती। तस्याः महद्वैशिष्ट्यमित्थं प्रतिभाति यद् कार्यनिष्पादने यानि कानि विघ्नानि समापतितानि स्युः तानि सर्वाणि शान्तचेतसा प्रसह्य कार्यं पूर्णतामनयत्। स्वमूलगुणान् निरतिचारं निरन्तरायञ्चानुपालयन् सा स्वकीयं समग्रं समयं आर्षपरम्परायाः जैनधर्मस्य च परमप्रभावनायां समर्पयति। पञ्चाशतवर्षेभ्यः सा स्वकीयसाधनायामचलवदचला सुशोभते।

पूजनीयमातश्रियः आर्यिकादीक्षायाः स्वर्णजयन्तीमहोत्सवावसरे कोटिशः मङ्गलभावनाः भावयामो वयम् –

**यस्याः सौधसुवर्णगोपुरमणिर्धम्मिलचूडामणिः**
**सामोदामलपुष्पकीर्णसुपथाः सौभाग्यमुक्तास्रजः।**
**कासारो ब्जपरागवारिविमलः सच्चित्रहेमांशुकः**
**तट्'टीकेतपुरं' बभूव नगरं उत्तरप्रदेशाञ्चले।।१।।**
**निःशेषैः शुभलक्षणैः श्रितवपुः शुभजैनसंलक्षणा**
**बाल्यादेव निदर्शिताद्भुतरसा जैनेन्द्रनामामते।**
**'मैना'ख्या निजजन्मना पुरमिदं चक्रे परं पावनम्**
**शैलेन्द्रं गिरिजेव मैथिलकुलं सीतेव पूतात्मना।।२।।**
**यदीय-भाषा परमा प्रसन्ना विवादशून्या अपवादमौन्या।**
**धन्या वदान्या वर-पुण्यपण्याः,**
**जीव्याच्चिरं ज्ञानमतीति गणिनी।।३।।**
**सर्वेषु सत्त्वेषु यदीयमैत्र्यं, प्रमोदभावेन सहैव वर्तते।**
**विद्वत्सु निखिलेष्वितरेषु माध्यं,**
**जीव्याच्चिरं ज्ञानमतीति गणिनी।।४।।**

यदपि निजसपर्यां प्रत्युदासीनचित्ता,
तदपि विहितमस्मत्पूजनं स्वीकतास्त्वम्।
निखिलभुवनगर्भं पूरयन्नात्मभासा
रवियरूपह्नतदीर्घं सर्वदाङ्गीकरोति।।५।।
गणिनीप्रमुखायै सदानुरक्ताः
भक्त्या वचनपुष्पमुपाहरामः।
आशास्महे तच् चिरायुरनामयं च
येनान्वहं गुणगणो द्विगुणत्वमेतु।।६।।

*सेवानिवत्त– प्राध्यापकः*
*२८, सरस्वती कॉलोनी*
*दमोह (म.प्र.)*

———ooo———